अप्युर्द्धमैर्गिरिगदेषुभिरङ्गदाद्याः
मीताभिमर्षहतमङ्गलरावणीयान् ।” )

वरूथः, पुं, ( व्रियते रथोऽनेनेति । वृञ् वरणे + “जॄवृञ्भ्यामूथन् ।” उणा० २ । ६ । इति ऊथन् । ) परप्रहरणाभिघातरक्षार्थं रथस्य सन्नाहवद्दृढदारुरचितादि द्रव्यं तत् । तत्पर्य्यायः । रथगुप्तिः २ । इत्यमरभरतौ । २ । ८ । ५७ ॥ रथसंवृतिः ३ । इति जटाधरः ॥ ( यथा, रामायणे । ६ । ५७ । २६ ।
“उरगध्वजदुर्द्धर्षं सुवरूथं स्वपस्करम् ॥”
ग्रामविशेषः । यथा, तत्रैव । २ । ७१ । ११ ।
“तोरणं दक्षिणार्द्धेन जम्बूप्रस्थं समागमत् ।
वरूथञ्च ययौ रम्यं ग्रामं दशरथात्मजः ॥”)

वरूथिनी, स्त्री, ( वरूथं तनुत्राणादिकमस्त्यस्या इति । वरूथ + इनिः । ङीप् । ) सेना । इत्यमरः । २ । ८ । ७८ ॥ ( यथा, रघुः । ११ । ५८ ।
“तस्य जातु मरुतः प्रतीपगाः
वर्त्मसु ध्वजतरुप्रमाथिनः ।
चिक्लिशुर्भृशतया वरूथिनी-
मुत्तटा इव नदीरयाः स्थलीम् ॥” )

वरेण्यं, क्ली, ( व्रियते लोकैरिति । वृ + “वृञ एण्यः ।” उणा० ३ । ९८ । इति एण्यः । ) कुङ्कुमम् । इति राजनिर्घण्टः ॥

वरेण्यः, त्रि, ( वृ + एण्यः । ) प्रधानः । इत्यमरः । ३ । १ । ५७ ॥ (यथा, भट्टिः । १ । ४ ।
“पुण्यो महाब्रह्मसमूहजुष्टः
सन्तर्पणो नाकसदां वरेण्यः ॥”
वरणीयः । इति मल्लिनाथः ॥ यथा, कुमारे । ७ । ९० ।
“संस्कारपूतेन वरं वरेण्यं
वधूं सुखग्राह्यनिबन्धनेन ॥”
पुं, पितृगणानामन्यतमः । यथा, मार्कण्डेये । ९६ । ३५ ।
“वरो वरेण्यो वरदो पुष्टिदस्तुष्टिदस्तथा ॥”
भृगुपुत्रविशेषः । यथा, महाभारते । १३ । ८५ । १२९ ।
“भृगोस्तु पुत्राः सप्तासन् सर्व्वे तुल्या भृगोर्गुणैः ।
च्यवनो वज्रशीर्षश्च शुचिरौर्व्वस्तथैव च ।
शुक्रो वरेण्यश्च विभुः सवनश्चेति सप्त ते ॥”
महादेवः । यथा, तत्रैव शिवसहस्रनामकीर्त्तने । १३ । १७ । १३६ ।
“वरो वराहो वरदो वरेण्यः सुमहास्वनः ॥”)

वरेन्द्री, स्त्री, गौड़देशः । इति त्रिकाण्डशेषः ॥

वरेश्वरः, पुं, ( वरः श्रेष्ठ ईश्वरः । ) शिवः । इति शब्दरत्नावली ॥

वरोटं, क्ली, ( वराणि श्रेष्ठानि उटानि दलानि अस्य । ) मरुवकपुष्पम् । इति शब्दमाला ॥

वरोलः, पुं स्त्री, ( वृ + ओलच् । ) वरटः । इति त्रिकाण्डशेषः ॥

वर्करः, पुं, ( वृक्यते गृह्यते इति । वृक आदाने + बहुलवचनात् अरः । इत्युज्ज्वलदत्तः । १ । १११ । ) युवपशुः । इत्यमरः । २ । १० । २३ ॥ मेषशावकः । इति तट्टीकायां भरतः ॥ परिहासः । ( यथा, अमरुशतके । ७ ।
“कान्तः केलिरुचिर्युवा सहृदयस्तादृक् पतिः कातरे
किन्नो वर्करकर्करैः प्रियशतैराक्रम्य विक्रीयते ॥” )
छागः । इति मेदिनी । रे, २१० ॥

वर्कराटः, पुंः ( वर्करं परिहासं अटति गच्छतीति । अट् + अच् । ) कटाक्षः । तरुणादित्यरोचिः । नारीपयोधरोत्सङ्गकान्तदत्तनखक्षतः । इति मेदिनी । टे, ६५ ॥

वर्गः, पुं, ( वृज्यते इति । वृजी वर्ज्जने + घञ् । ) सजातीयसमूहः । ( यथा, रघुः । २ । ४ ।
“व्रताय तेनानुचरेण धेनो-
र्न्यषेधि शेषोऽप्यनुयायिवर्गः ॥”)
समानधर्म्मिभिः प्राणिभिरप्राणिभिरुपलक्षितं द्वन्द्वम् । यथा कवर्गः । अत्र कत्वखत्वादिना विजातीयत्वेऽपि स्थानसाम्यमस्ति । इत्यमरभरतौ ॥ ग्रन्थपरिच्छेदः । यथा,—
“सर्गो वर्गपरिच्छेदोद्घाताध्यायाङ्कसंग्रहाः ।
उच्छ्वासः परिवर्त्तश्च पटलः काण्डमस्त्रियाम् ।
स्थानं प्रकरणं पर्व्वाह्निकञ्च ग्रन्थसन्धयः ॥”
इति त्रिकाण्डशेषः ॥
समानाङ्कद्वयस्य पूरणम् । तत्पर्य्यायः । कृतिः २ । वर्गे करणसूत्रं वृत्तद्वयम् ।
“समद्विघातः कृतिरुच्यतेऽथ
स्थाप्योऽन्त्यवर्गो द्विगुणान्त्यनिघ्नः ।
स्वस्वोपरिष्टाच्च तथापरेऽङ्का-
स्त्यक्त्वान्त्यमुत्सार्य्य पुनश्च राशिम् ॥
खण्डद्वयस्याभिहतिर्द्विनिघ्नी
तत्खण्डवर्गैक्ययुता कृतिर्व्वा ।
इष्टोनयुग्राशिवधः कृतिः स्या-
दिष्टस्य वर्गेण समन्वितो वा ॥” * ॥
अस्योद्देशकः ।
“सखे नवानाञ्च चतुर्द्दशानां
ब्रूहि त्रिहीनस्य शतत्रयस्य ।
पञ्चोत्तरस्याप्ययुतस्य वर्गं
जानासि चेद्वर्गविधानमार्गम् ॥”
न्यासः ९ । १४ । २९७ । १०००५ । एषां यथोक्तकरणेन जाता वर्गाः ८१ । १९६ । ८८२०९ । १००१०००२५ ॥ अथवा नवानां खण्डे ४ । ५ । अनयोराहतिः २० । द्विनिघ्नी ४० । तत्खण्डवर्गैक्येन ४१ । युता जाता सैव कृतिः ८१ ॥ अथवा चतुर्द्दशानां खण्डे ६ । ८ । अनयोराहतिः ४८ । द्विनिघ्नी ९६ । तत्खण्डवर्गौ ३६ । ६४ । अनयोरैक्येन १०० । युता जाता सैव कृतिः १९६ ॥ अथवा खण्डे ४ । १० । तथापि सैव कृतिः १९६ ॥ अथवा राशिः २९७ । अयं त्रिभिरूनः पृथग्युतश्च २९४ । ३०० । अनयोर्घातः ८८२०० । त्रिवर्गे ९ युतो जातो वर्गः स एव ८८२०९ ॥ एवं सर्व्वत्रापि इति लीलावत्यां वर्गः ॥ ( स्त्री, अप्सरोविशेषः । यथा, महाभारते । १ । २१७ । १५ ।
“अप्सरास्मि महाबाहो देवारण्यविहारिणी ।
इष्टा धनपतेर्नित्यं वर्गा नाम महाबल ॥”
मुनिशापात् ग्राहरूपिणीयं अर्ज्जुनात् शापमुक्तासीत् । एतद्वृत्तान्तन्तु तत्रैव द्रष्टव्यम् ।)

वर्गमूलं, क्ली, ( वर्गस्य समानाङ्कद्वयस्य मूलम् आद्याङ्कः । ) पूरितसमानाङ्कद्वयस्याद्याङ्कः । यथा । वर्गमूले करणसूत्रं वृत्तम् ।
“त्यक्त्वान्त्याद्विषमात् कृतिं द्विगुणयेन्मूलं समे तद्धृते
त्यक्त्वालब्धकृतिं तदाद्यविषमाल्लब्धं द्विनिघ्नं न्यसेत् ।
पङ्क्त्यां पङ्क्तिहृते समेऽन्यविषमात् त्यक्त्वाप्तवर्गं फलं
पङ्क्त्यां तद्द्विगुणं न्यसेदिति मुहुः पङ्क्तेर्दलं स्यात् पदम् ॥” * ॥
अस्योद्देशकः ।
“मूलं चतुर्णाञ्च तथा नवानां
पूर्व्वं कृतानाञ्च सखे कृतीनाम् ।
पृथक् पृथग्वर्गपदानि विद्धि
बुद्धेर्व्विवृद्धिर्यदि तेऽत्र जाता ॥”
न्यासः ४ । ९ । ८१ । १९६ । ८८२०९ । १०० १०००२५ । लब्धानि क्रमेण मूलानि २ । ३ । ९ । १४ । २९७ । १०००५ । इति लीलावत्यां वर्गमूलम् ॥
सजातीयाङ्कत्रयस्य घातः घनः । तस्य तन्मूलस्य च समुदायस्त्रोदाहरणानि पूर्व्वं न लिखितानि प्रसङ्गादत्र पुनर्लिख्यन्ते । घने करणसूत्रं वृत्तत्रयम् ।
‘समत्रिघातश्च घनः प्रदिष्टः
स्थाप्यो घनोऽन्त्यस्य ततोऽन्त्यवर्गः ।
आदित्रिनिघ्नस्तत आदिवर्ग-
स्त्र्यन्त्याहतोऽथादिघनश्च सर्व्वे ॥
स्थानान्तरत्वेन युता घनः स्यात्
प्रकल्प्य तत् खण्डयुगं ततोऽन्यम् ।
एवं मुहुर्व्वर्गघनप्रसिद्धा-
वाद्याङ्कतो वा विधिरेष कार्य्यः ॥
खण्डाभ्यां वा हतो राशिस्त्रिघ्नः खण्डघनैक्ययुक् ।
वर्गमूलघनः स्वघ्नो वर्गराशेर्घनो भवेत् ॥” * ॥
अस्योद्देशकः ।
“नवघनं त्रिघनस्य घनं तथा
कथय पञ्चघनस्य घनञ्च मे ।
घनपदञ्च ततोऽपि घनात् सखे
यदि घनेऽस्ति घना भवतो मतिः ॥”
न्यासः ९ । २७ । १२५ । जाताः क्रमेण घनाः ७२९ । १९६८३ । १९५३१२५ ॥ अथवा राशिः ९ । अस्य खण्डे ४ । ५ । आभ्यां राशिर्हतः १८० त्रिनिघ्नश्च ५४० । खण्डघनैक्येन १८९ । युतो जातो घनः ७२९ ॥ अथवा राशिः २७ । अस्य खण्डे २० । ७ । आभ्यां हतस्त्रिघ्नश्च ११३४० । खण्डघनैक्येन ८३४३ । युतो जातो घनः १९६८३ ॥ अथवा राशिः [illegible] । अस्य